# राम इति नित्यं जपत्यक्षरद्वयम् ।

## रामचरितमानसोत्तरकाण्डेऽन्यतमशिवस्तुतेरतिलघुकल्याणव्याख्या

*Gianni Pellegrini*

This short work (bearing the title: *“Rāma!” [She] constantly repeats two syllables. A very short* Kalyāṇa *elucidation of one among Śiva’s hymns in the* Uttarakāṇḍa *of the* Rāmacaritamānasa) consists in an extremely concise as well as newly composed Sanskrit commentary on a Śiva’s hymn chanted to Rāma, once he was back to Ayodhyā at the end of the war against Rāvaṇa. These ten *avadhī*-verses hosted in the *Uttarakāṇḍa* (7.13.1-10) of Tulasī Dāsa’s *Rāmacaritamānasa* extol Rāma as the Supreme Being, the ultimate *reservoir* of all devotions, thoughts and acts.

### संगतिः

*सौन्दर्यसारसर्वस्वं माधुर्यगुणबृंहितम् । ब्रह्मैकमद्वितीयं तत् तत्त्वमेकं द्विधा कृतम् ।।*
*वेदादिशास्त्रसंवेद्यं सीतारामस्वरूपकम् । सरहस्यं सतां सेव्यमद्भूतं प्रणमाम्यहम् ।।*[1]
*ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने । व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ।।*

अथायं टिप्पण्यात्मको निबन्धोऽस्मदन्तःहृदये आसीनानां **पिनुच्चा-कारा**क्कीति नामीकानाम् अद्भूतप्राणिनां प्रसादाय स्वान्तःसुखाय च लिख्यते, यासु स्थितासु प्रफुल्लति आह्लादति चास्माकं सर्वस्वम्, यासां पिनुच्चानां स्वभावाय चरित्राय च प्रणमामि मुहुर्मुहुः ।

यस्मात् श्रीमद्गोस्वामितुलसीदासमहानुभावैः प्रणीतं श्रीरामचरितमानसं श्रीमतिभ्यः पिनुच्चाभ्योऽतीव रोचते, तस्मादहमत्र दशछंदोबद्धस्य शंभुगीतस्तोत्रस्य सुप्रियसंस्कारोद्भावकस्य अतिलघुकायं कल्याणाख्यं व्याख्यानं यथाशक्ति यथामति च रचयिष्यामि । वस्तुतस्तु गोस्वामिग्रन्थस्यातिगंभीरार्थत्वाद् विदुषामपि दुरुहः, अतः किमुत मम बालकस्य शेमुषी । एवं सत्यपि महिम्नस्तोत्रवचनं “*ममापि एष स्तोत्रे हर निरपवादः परिकरः*”[2] इति मनसि निधाय, अहमपि किंचित् प्रकटयितुं प्रवर्ते ।

### अथ कल्याणव्याख्या

गोस्वामिभिः प्रणीतस्य श्रीरामचरितमानसस्योत्तरकाण्डे यदा युद्धानन्तरं श्रीरामचन्द्रो रावणं पराजित्य, पुष्पविमानं चारुह्य सीतया विभूषितः सभ्रतरोऽयोध्यां प्रत्यवर्तत, तस्मिन्नवसरे महान्महोत्सवस्तत्राभूत् । अनेकाः देवताः, ऋषयः सर्वे, चत्वारो वेदाश्च स्वां स्वां स्तुतिं प्रस्तुतवन्तः । भगवान् देवदेवो जगत्पतिः गिरीशोऽपि, यो नित्यम् अक्षरद्वयात्मकं राम इति नाम परमतारकमन्त्रं जपति, स एव अश्रुपूर्णाकुलेक्षणो गद्गदस्वरेण लोकप्रियावधिभाषायाम् इदमतिमनोहरमतिगभीरं स्तोत्रमुद्गातुम् आरब्धवान्–

**जय राम रमारमनं समनं । भव ताप भयाकुल पाहि जनं ॥**

परमपुरषे यस्मिन् रमन्ते प्राप्तप्राप्यसाधवः, यम् अयोध्याधिपतिं नित्यं ध्यायन्ति योगिनः, स एवात्र प्राकृतः संबोधनाहूतः । हे **राम** ! हे मर्यादापुरुषोत्तम, अकारणकरुणावरुणालय **जय** विजयस्व, अनन्तकोटिब्रह्माण्डघटितासु सर्वासु अवस्थासु अपराजितोऽद्वितीयो भव । यो रघुवीरः पराम्बायाः **रमा**याः सर्वेषां प्राणिनामनुस्यूतशक्तेस्सीतायाः **रमनं** आनन्दः स्वयं “*विज्ञानमानन्दं ब्रह्म*” इति

[1] श्रीकरपात्रस्वामिप्रणीतायां रामायणमीमांसायां पृ. १ ।

[2] शिवमहिम्नस्तोत्रे १ ।

वाजसनेयकश्रुतेः,[3] स **समनं** शमनमेव सर्वेषां संसारान्तर्भूतानाम् अधिदैविकाधिभौतिकाध्यात्मिकदुःखानां समूलोच्छेद एव, न तूच्छेदकमात्रः । यत्रोच्छेदकस्तत्र उच्छेद्योच्छेदनेऽपि स्वभावतोऽन्ये द्वे तत्त्वे वर्तेते, अतः स्फुटितद्वैतप्रतिबन्धकत्वाद्विलम्बेन उद्धरणं विद्यते, शीघ्रं तु भवति यत्र एकमेव तत्त्वम् उच्छेदमात्र इति । यस्मिन् कस्मिंश्चिदवसरे रामे केवले विद्यमाने सति तु दुःखात्यन्ताभावो भवत्येव, येन अत उच्छेदमात्रः स्यात्, तयोः रामदुःखयोस्तमःप्रकाशवत् विरुद्धस्वभावत्वादिति चिन्त्यम् ।

हे रघुवंशभूषण ! **पाहि** पालय **भव**कूपे पतितमिमं **जनं** जीवात्मानमुद्धर, त्वत्कृपापिपासुरयं जीवः परिभ्रमति निरन्तरमस्मिन् मरुस्थलरूपिणि भवचक्रे, जन्ममरणाद्यानल**तापा**तप्तोऽतो **भयाकुल** त्रासातुरः किंगन्तव्यविमूढो भवति । यावत प्राणी द्वैतमनुभवति तावद्बिभेति "*द्वितीयाद्वै भयं भवति*"[4] इति श्रुतेः । तस्मात् शोकाभिभूतस्त्वम् अशेषभेदविभेदनेऽभयेऽद्वैतेऽनन्यभक्त्या जानकीपतौ शरणमन्विच्छ ।

### अवधेस सुरेस रमेस बिभो । सरनागत मागत पाहि प्रभो ॥ १ ॥

हे **अवधेस** ! अवधनिवासिनां स्वामीति अतोऽवधेशः । न तु केवलमवधराज्यमीष्टेऽपितु **सुरेस** अपि, यो देवानां लोकेषु आधिपत्यं बिभर्ति स एव **रमेस** रमेशो भवितुमर्हति । सर्वाण्यपि भूतानि अघटितघटनापटीयसीमंगलमयीमायायाः शक्तेर्वशे वर्तन्ते, स तु श्रीरामः शक्तिमान्, अतो मायवी । एवं हि अन्यैः सेव्यमाना लक्ष्मीदेवी, सैव सेवते नित्यं पदयुगलं त्वदीयम् । हे **विभो** ! हे विष्णो ! हे परब्रह्मस्वरूप ! यथा भाष्यकारैः भगवत्पादैरपि शारीरकभाष्ये[5] स्पष्टीकृतं बृहतेर्धातोः व्यापनार्थत्वम्, ब्रह्मणो देशपरिच्छेदोपलक्षितपरिच्छेदत्रयापरिच्छिन्नापरिच्छिद्यमानत्वात् । अतोऽमूर्तम् आत्माभिन्नपरब्रह्म रामो विष्णुस्वरूपभगवान् व्यापकोऽपि भक्तवात्सल्यवशाद् अयोध्यापुर्यन्तर्गृहे मूर्तिमान् बभूव, भवति, भविष्यति च, परमसत्यस्य रघुवंशनायकस्य त्रिकालाबाध्यत्वात् ।

भो **प्रभो** भगवन् **पाहि** अव माम्, हे कृपासिन्धो पालय मां यं संसारसागरनिमग्नं **मागात** विषीदन्तं **सरनागत** त्वच्चरणोः शरणागतम्, जन्ममरणादिक्लेशप्रवाहपातात् सर्वथा तुभ्यं विश्रमं प्रार्थयन्तम् । हे दीनबन्धो भवज्वालामुखेः नानातापतातप्यमानस्य मम क्रन्दनं शृणु ! इति ॥ १ ॥

### दससीस बिनासन बीस भुजा । कृत दूरि महा महि भूरि रुजा ॥

हे अच्युत ! **दससीस** दशवदनस्य **बीस भुजा** विंशतिबाहुकस्य रावणस्य **बिनासन** विनाशनं ध्वंसस्त्वमेव नान्यः, यथा भैरवरूपं धारयित्वा सर्वान् भीषयसि "*भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥*"[6] इति काठके "*कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे*"[7] इति स्मृतेश्च, त्वमेव अभयस्वरूपः "*अभयं वै जनक प्राप्तोऽसि*" इति श्रुतेः[8], "*अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः । योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥*"[9] इति आगमशास्त्राच्च ।

हे दयासागर ! यावन्तः **महा** अतिभीषणाः **रुजा** रोगाः कायिकवाचिकमानसिकव्याधयः **महि** धरित्रीताले भवन्ति, तावतः **भूरि** सर्वान् **दूरि** दुरं **कृत** कुरु, अपनोद मनसः, शरीराच्च अखिलान् विकारान् तत्संबन्धिचिन्ताश्च, अन्यविषयवृत्तीन् अपि च समूलम् उन्मूल । हे हितकारिन् शाधि नः परमार्थपाथेये, यतो मम एकैव वृत्तिर्भूयात्, त्वदीयातिरमणीयाकाराकारिता ।

### रजनीचर बृंद पतंग रहे । सर पावक तेज प्रचंड दहे ॥ २ ॥

हे महेष्वास ! त्वदतिप्रज्वलितवह्निरूपिपराक्रमसमक्षं **रजनीचर बृंद** निशाचरचमू, राक्षसानां सेना **पतंग** पतंगा इव कीटपतंगादयो यथा जातवेदाकृष्टाः **रहे** वर्तन्ते, तथा तवाक्षयतूणीरस्थः **सर** बाणः **पावक प्रचंड तेज** अग्नेः दारुणौष्णमिव **दहे** दग्ध्वा तान्

---

[3] बृहदारण्यकोपनिषदि ३।९।२२ ।

[4] बृहदारण्यकोपनिषदि १।४।२ ।

[5] ब्रह्मसूत्रभाष्ये १।१।१ अनुसंधेयम् ।

[6] कठोपनिषदि २।३।३ । तैत्तिरीयोपनिषदि २।८।१ अपि द्रष्टव्यम् ।

[7] वाल्मीकिरामायणे १।१।४ ।

[8] बृहदारण्यकोपनिषदि ४।२।४ ।

[9] गौडपादीयकारिकायाम् ३।३९ ।

शलभवद्राक्षसान् भस्मसत्कुरुते । हे करुणनिधे द्वेषरीत्या तेषामपि दुर्बुद्धीनाम् आततायिनां त्वदीयेन शल्यरूप्याशीषा पापानि विधूयन्त इत्याशयः ॥ २ ॥[10]

### महि मंडल मंडन चारुतरं । धृत सायक चाप निषंग बरं ॥

भो साक्षान्मन्मथमन्मथ ! **महि मंडल** पृथिव्याः संपूर्णाया आयतेः **चारुतरं मंडन** अमूल्यभूषणं त्वमेव । न केवलं महिमण्डलेऽपितु त्रैलोक्ये, तथा अनन्तकोटिब्रह्माण्डेऽपि नास्ति महार्हतरं मण्डनम् । किं बहुना, सुन्दराणां समस्तवस्तूनां यत्साक्षात्सौन्दर्यम् अतिरमणीये त्वयि मनोहरे सदर्थवत्तां भजते "*तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति*"[11] इति श्रवणात् ।

हे शूरसत्तम ! **धृत** त्वया धार्यन्तेऽनेकानि आयुधानि, तेषां मध्ये तु अन्यतमानि **बरं** श्रेष्ठाणि, यथा **सायक** इषुकाः, **चाप** धनुः **निषंग** तूणीरश्च ।धनुर्धरत्वं त्वदीयम् अनेकेषु वृत्तान्तेषु कीर्तितम्, यच्च त्वदीयायुधानि एव त्वदतिप्रियाणि त्वयैव प्रमाणितं विदेहराज्ये, यदा सर्वेषु आश्चर्यचकितेषु सत्सु जनकराज्ञः सम्मुखे जनकीस्वयंवरेऽस्मदीयं शांभवीयमपि धनुर्तिरस्कृत्य भंगोऽभूद् इत्युवाच शंकरः साक्षात् ।

### मद मोह महा ममता रजनी । तम पुंज दिवाकर तेज अनी ॥ ३ ॥

हे तमसः परस्तात् परमार्क !**मद** विषयेष्वन्धाभिमान आकर्षणं च, **मोह** सदसदविवेको यः कर्तव्याकर्तव्यभ्रान्तौ बुद्धिनाशे च परिणमते । **ममता** च अनात्मस्वरूपजडेषु पदार्थेषु "इदं मम, अहमिदम्" इति वस्तुतोऽसंबद्धेषु घटपटमठादिषु शरीरेन्द्रियान्तःकरणादिषु बाह्याभ्यन्तरवस्तुषु च योऽध्यस्तस्वामित्वभाव इति ईदृशी ममता अभिप्रेता । ताः मदमोहममताः विशेषत्वेन पृथक्पृथग् सन्ति, सामान्यत्वेन तु अपृथक्, समानरूपाः प्रतीयन्ते । कदा कथं च समानरूपा भवन्तीति पृष्टे सति **महा रजनी** घोरान्धकारायां निशायां यस्यां प्राणी किमपि न पश्यति, स्वमपि न परिजानाति, तस्यां रजन्यां शेरते जन्तवः सर्वे । एक एव चेतनो योगी स्वान्तःगुहायां निहितं ज्योतिःस्वरूपरामचन्द्रं ध्यायति अजस्रम् "*या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः*"[12] इति गीतावचनात् ।

परन्तु तस्याः निशायाः **तम पुंज** घनतमःस्वरूपायाः प्रतिद्वन्द्वी त्वमेव, यतो **दिवाकर** ज्ञानस्वरूपभास्कर इव विभ्राजसे । यथा तस्य भानोः **तेज अनी** रश्मीनां समूहः, रात्रेस्तमांसि अपनुद्य प्रदीप्यते सर्वत्र, तथैव अनन्तकोटितेजोराशी ज्ञानभास्करो जाड्यान्धकारं भित्त्वा अविद्याया अस्तमयं गमयित्वा स्वप्रकाशस्वरूपं द्योतयति स्वतः "*वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय*"[13] इति दिक् ॥ ३ ॥

### मनजात किरात निपात किए । मृग लोग कुभोग सरेन हिए ॥

**मनजात** मनसो जायते इति मनोजः, कामदेवः मन्मथः, स एव **किरात** महाव्याधो भवति । कथमिति के अस्य मदनस्य लक्षा इति जिज्ञासायां सत्यामुच्यते – कुसुमेषुररविन्दाशोकचूतनवमल्लिकानीलोत्पलनामकपञ्चबाणयुक्तो **मृग** मृगपशुरूपाः **लोग** जनाः मनुष्या इत्यर्थः, तेषां जनानां हृदयं **कुभोग** शरीरेन्द्रियचित्तासक्तिकारेण **सरेन** कामविषयशरेण **हिए** प्रहरति, हिनस्ति, निहत्य च **निपात किए** नैष्ठुर्येण निपातयति ।

### हति नाथ अनाथनि पाहि हरे । बिषया बन पाँवर भूलि परे ॥ ४ ॥

हे **नाथ**, सर्वेश्वर ! हे **हरे** पापतापान्तक ! त्वं तं व्याधवेषं रतिपतिं **हति** हत्वा **बिषया** नानाविधविषयरूपे **बन** घनारण्ये **भूलि** दन्द्रम्यमानाः क्वगन्तव्यविमूढाः विस्मृतमार्गाः स्वस्वरूपस्य प्रच्युतत्वात्, परियन्ति इतस्ततः **पाँमर** घनजाड्यापहतचेताः मूढास्ते परिवर्तन्ते, यथा "*अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितमन्यमानाः । दन्द्रम्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः*"[14] इति काठकशाखायाः । हे अकारणकरुणावरुणालय **अनाथनि** अनाथान् शरणरहितान् तान् जनान् अस्माभिः सहितान् हे अशरणशरण, अनाथनाथ **पाहि** उद्धर दुःखनिरोधित्वदीयहस्तछायया गोपय ॥ ४ ॥

---

[10] यद्यपि अन्यस्मिन् संदर्भे पठ्यते, तथापि मुण्डकोपनिषदि २।२।३-४ दृष्टान्तोऽपि द्रष्टव्यः ।

[11] कठोपनिषदि २।२।१५, मुण्डकोपनिषदि २।२।१०, तथा श्वेताश्वतरोपनिषदि ६।१४ ।

[12] श्रीमद्भगवद्गीतायाम् २।६९ ।

[13] श्वेताश्वतरोपनिषदि ३।८ ।

[14] कठोपनिषदि १।२।५ ।

**बहु रोग बियोगन्हि लोग हए । भवदंघ्रि निरादर के फल ए ॥**

**बहु** बहवोऽनेके नानाविधाः **रोग** रोगाः, व्याधयस्तैः, एवं **बियोगन्हि** वियोगैः प्रियवस्तुवियोगैरप्रियवस्तुसंयोगैश्च **हए** हता अभिहताः**,** घ्नाताः **लोग** जनाः, सर्वे मनुष्याः, प्राणिनः समे । एतत् सर्वं **भवदंघ्रि** त्वदीयचरणयुगलं प्रति **निरादर** अनादरस्य, उपेक्षायाः, निराकरणस्य **फल** फलानि, परिणामाः **ए** भवन्ति ।

**भव सिंधु अगाध परे नर ते । पद पंकज प्रेम न जे करते ॥ ५ ॥**

**जे** ये **नर** मानवाः, प्राणिनः **पद पंकज** त्वदीयपद्मांघ्रियुगं **प्रेम न करते** प्रेमाणं न कुर्वन्ति, प्रीतिं नानुभवन्ति, अनुरक्तिं न कुर्वन्ति, **ते** इमे **अगाध** अतिगभीरे भयङ्करे **भव सिंधु** महाकल्लोलसंसारसागरे, प्रपञ्चस्य गाढदुःखावर्तवत्समुद्रे **परे** निपतितेषु सत्सु निमग्ना वर्तन्त इति संक्षेपः ॥ ५ ॥

**अति दीन मलीन दुखी नितहीं । जिन्ह कें पद पंकज प्रीति नहीं ॥**

**जिन्ह कें** येषां मनुष्यानां **पद पंकज** त्वच्चरणकमलयोः **प्रीति** प्रेम, आसक्तिः **नहीं** नास्ति, ते **अति दीन** महादीना अत्यन्ताः कृपणाः, **मलिन** बाह्याभ्यन्तराशुद्धा एवंविधजनाः **नितहीं** सदैव पदे पदे **दुखी** उद्विग्नाः, सर्वासु अवस्थासु अभितप्ताः, शरीरे पीडिताः**,** मनसि व्यथिताः विविधदुःखग्रस्ताः, यत्र कुत्रापि येन केन प्रकारेण जीवनयत्नतापाद् विश्रमं कथमपि न प्राप्नुवन्ति ।

**अवलंब भवंत कथा जिन्ह कें । प्रिय संत अनंत सदा तिन्ह कें ॥ ६ ॥**

वैपरीत्येन **जिन्ह कें** येषाम् **अवलंब** आश्रयः, शरणं **भवंत** भवदीया **कथा** त्वदियं चरित्रवृत्तान्तं वर्तते, **तिन्हे कें** तेषां कृते ये **संत** संतस्तव भक्ताः साधवो योगिनश्च एवं यः **अनंत** कालदेशवस्तुपरिच्छेदरहितो भगवान् सत्यज्ञानानन्तोऽद्वैयानन्दस्वरूपश्च **सदा** सर्वदैव ते उभयवर्गाः **प्रिय** प्रेमास्पदा वर्तन्ते । कश्च परमप्रेमास्पद इति जिज्ञासिते सति, सम्यक्तया प्रतिपद्यते यथा "*इयमात्मा परानन्दः परप्रेमास्पदं यतः । मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥ ८ ॥ तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनः । अतस्तत्परमं तेन परमानन्दताऽत्मनः ॥ ९ ॥ अभाने न परं प्रेम भाने न विषये स्पृहा । अतो भानेऽप्यभाताऽसौ परमानन्दतात्मनः ॥ ११ ॥*"[15] इति विद्यारण्यमुनेरुपदेशात् । किं च ये साक्षात्कृताभेदाः प्रत्यभिज्ञातात्मानः "*ब्रह्मविद् ब्रह्मैव भवति*"[16] इति श्रुतिवचनाद् ब्रह्मभूतास्ते एवं शुद्धबुद्धमुक्तस्वभवोऽखण्डानन्दघनः परमेश्वरः, तावुभौ साध्वीश्वरौ अचिन्त्यलीलया द्वौ भास्यमानौ, अभिन्नावपि भक्त्यर्थं भिन्नाविव प्रतीयेते, वस्तुतस्तु इमौ एक एव भवतः, यतः "*द्वैतं मोहाय बोधात् प्राक् प्राप्ते बोधे मनीषया । भक्त्यर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम् ॥*"[17] इति नरहरिणा बोधसारे स्पष्टीकृतम् ॥ ६ ॥

**नहिं राग न लोभ न मान मदा । तिन्ह कें सम बैभव वा बिपदा ॥**

अत एवंविधाः महानुभावाः साक्षात्कृतस्वस्वरूपाः, प्रत्यगात्मानं ब्रह्माभिन्नत्वेन अनुभूयमानाः, तेषां **नहिं राग** नैव विषयेषु राग उत्पद्यते न तु द्वेषः, **न** च तेषां **लोभ** तृष्णा भवति, **न** वै तेषु **मान मदा** गन्धमात्रमिथ्याभिमानोद्भूतोन्मदो विद्यते । यद्वा न वित्तपुत्रलोकस्थानीयपादोत्थाभिमानो वर्तते, न च तत्पराकाष्ठारूपमदः संभवति । ते साधवो युक्तचित्तेन्द्रियग्रामा रागद्वेषमोहलोभमदमात्सर्यादिहीनाः शुद्धा इति भावः । यतस्तैरनुभूत आनन्दैकरसात्मा, ते सर्वावसरेषु समाः, अतः **तिन्ह कें** तेषां कृते **बैभव** वैभवो विभवश्च, सुखरूपसंपत्तिः **वा** अथवा **बिपदा** दुःखरूपविपत्तिः **सम** अभिन्नो भवति, तेभ्यः संपत्तिविपत्ती उभेऽनन्ये प्रतिभातः । अथ साधूनां शरीरेन्द्रियान्तःकरणाभिमानशून्यानां समत्वसंप्राप्तयोगिनां समदर्शिनाम् आत्मारामाणां कृते सुखदुःखान्यतरभोगस्य तुच्छत्वात्, यथा "*समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।*"[18] तथा च "*समत्वं योग उच्यते*"[19] इति भगवदुक्त्योरिति संगृहीतार्थः।

---

[15] विद्यारण्यमुनिप्रणीते पञ्चदशीप्रथमप्रकरणे तत्त्वविवेके १।८-९, १।११ ।

[16] मुण्डकोपनिषदि ३।२।९ ।

[17] नरहरिप्रणीते बोधसारे १।१३।४२ ।

[18] श्रीमद्भगवद्गीतायाम् १४।२४ ।

[19] श्रीमद्भगवद्गीतायाम् २।४८ ।

### एहि तें तव सेवक होत मुदा । मुनि त्यागत जोग भरोस सदा ॥ ७ ॥

**एहि** एतेन प्रकारेण ये **मुनि** मुनयः, त्वन्नामश्रवणमनननिदिध्यासनशीलनात् दृष्टरामात्मानः, **तें** ते **जोग भरोस** शरीरोपमर्दकसाधनायाः श्रद्धाम्, विभिन्नधर्ममार्गाणां विश्वासं च **त्यागत** सर्वथा परित्यज्य, **सदा** सर्वदा अनुक्षणं च **तव** त्वदीयाः **सेवक** ललाटिककिङ्करा अंघ्रिपरिचराः **मुदा** आनन्दपूर्णहृदयेन **होत** भवन्ति । त्वयि दयालुपरमात्मनि एव नान्यस्मिन् विश्वसन्तीति यावत् । यथा चरमश्लोके भगवतः श्रीमुखादेव विनिश्रितम् "*सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।*"[20] इत्यनुसांधेयम् ॥ ७ ॥

### करि प्रेम निरंतर नेम[21] लिएँ । पद पंकज सेवत सुद्ध हिए ॥

एवंविधाः हरिभक्ताः मुनयः **सुद्ध** शुद्धानि **हिए** हृदयानि येषां ते शुद्धहृदयाः, निर्मलचित्ताः सन्तः **प्रेम करि** प्रेमाणं प्रीतिं कृत्वा **नेम** नियमेन संकल्पबलेन नियमं च **लिएँ** धारयित्वा, न तु कृत्रिमरूपेण अपितु अनायासेन स्वभाविकप्रवृत्त्या तं प्रेमविधिं स्वीकुर्वन्ति । ते नियतानुरक्ताः पवित्रभावनाः **निरंतर** नित्यमविरतमनिशं सततमेव त्वदीयं **पद पंकज** कमलचरणयुगं **सेवत** सेवन्ते, सुखेन परिचरन्ति, अतिशयेन प्रीयन्तीत्यर्थः ।

### सम मानि निरादर आदरही । सब संत सुखी बिचरंति मही ॥ ८ ॥

ये **सब** सर्वे **संत** मुनिवृन्दाः, महन्तः, **सम** समानं तुल्यमनन्यं यथा **निरादर** अनादरम्, अप्रियमशिवम् तथा **आदरही** आदरम्, प्रियं शिवम्, **मानि** अवीक्ष्य एवंमन्यमानाः "*तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।*"[22] इति यावत्, ते सन्तः **सुखी** आनन्दानुभावाः जीवन्मुक्ताः निर्लिप्ता अनिकेता अनग्रयो दिगम्बरास्त्यक्तैषणात्रययतिनोऽकर्तारोऽभोक्तारः **मही** पृथिवीं **बिचरंति** विचरन्ति, स्वेच्छाचारिणो यान्ति, परिभ्रमन्ति, परिव्रजन्ति, भैक्षचर्यं चरन्ति, स्वयं तीर्णभीषणभवार्णवा अन्यान् प्राणीनपि तारयितुं नित्यमुद्यन्तः परोपकारैकचक्षुषः "*शान्ता महन्तः निवसन्ति सन्तो वसन्तवल्लोकहितं चरन्तः । तीर्णाः स्वयं भीमभवार्णवं जनानहेतुनान्यानपि तारयन्तः ।।*"[23] इति आचार्यपादवचनादिति तात्पर्यम् ॥ ८ ॥

### मुनि मानस पंकज भृंग भजे । रघुबीर महा रनधीर अजे ॥

अहं प्राणिमात्रस्थानीयस्तुलसीदासः, **मुनि** मुनीनां **मानस पंकज** मनोकमलस्य **भृंग** भ्रमरम्, **रघुबीर** रघुवंशस्य वीरं राघवं श्रीरामं **महा रनधीर** युद्धक्षेत्रेऽत्यन्तं धीरं स्थिरं शूरतमम्, यस्य शत्रुषु पराक्रान्तेषु देहेन्द्रियमनांसि अविचलितानि, तं **अजे** अजेयमनभिभूतानभिभव्यं यद्वा अजं जन्मादिषड्विकारशून्यं मुनिचित्तांबुजद्विरेफरूपं रघुपतिमहं **भजे** नमामि पुनः पुनः, दण्डवत् साष्टांगं प्रणमामि । यथा पद्मे मध्वर्थं परागं चिन्वन् मधुरं गुञ्जति भ्रमरोऽनवरतः, तथैव मुनिहृदयकमले एक एव वृत्तिप्रवाहो निरन्तरं वहति रामतन्नामध्वानिरूप इत्ययं विमर्शः ।

### तव नाम जपामि नमामि हरी । भव रोग महागद मान अरी ॥ ९ ॥

अहं साधारणः प्राणी संसारमहाब्धौ निमज्जयन् **नाम** आस्यभूषणं नामधेयं **तव** त्वदीयं नित्यं **जपामि** क्रमेण वाचिकमानसोपांशु जपं करोमि, जपाजपम् अभ्यासेयमहं यावत् सिद्ध्येत । **हरी** हे हरे सर्वदुःखहर ! त्वदीयं नामलीलायुधचरित्रलोकभक्तान् **नमामि** प्रणमामि वन्दे, भजामि । यतो महानुभावाः निगदन्ति रामात्परं रामनामेति, अतो यद्यपि साध्यसाधनयोरभेदस्तथापि साधनस्य साध्यप्रापयितत्वेन उत्कृष्टत्वम् ।

हे दयासागर ! हे शोकभिषक् ! **भव** जन्ममरणादिरूपप्रपञ्च एव **रोग** रोगः, विकारो व्याधिः, तं प्रति त्वमेव **महागद** महौषधिः, त्वत्सदृशान्नान्यः प्रपिपक्षः । अगदश्च स्वास्थ्यमिति रोगाणां तत्कारणानां च समूलोच्छेदोऽपुनर्भवश्च । प्राकृते तु महांश्चासावगदो महागद इति । अत्र महदिति विशेषणेन स्वरूपावस्थितिरेव, नान्यल्लक्षणम् आपेक्षिकं स्वास्थ्यम् अभिप्रेतम् । तस्मात् श्रीरामस्य एव ब्रह्मात्माभिन्नरूपत्वाद् आत्मस्वरूपरामसाक्षात्कारो भवरोगापुनर्भवरूपमुक्तिः । हे राम, हे अजेय, हे अपराजित

---

[20] श्रीमद्भगवद्गीतायाम् १८।६६ ।

[21] नेमु इति पाठान्तरम् ।

[22] श्रीमद्भगवद्गीतायाम् १४।२४ ।

[23] विवेकचूडामणौ ३९ ।

! त्वत्समक्षं **मान** मिथ्याभिमानमदमोहलोभादिराक्षसाः सर्वेऽभ्यन्तरशत्रवः कम्पन्ते, परिद्रवन्ति, क्षीयन्ते हृदयग्रन्थय इत्यर्थः । त्वमेव **अरी** मत्तमतङ्गहृदयग्रन्थिरूपिरिपूणां विरोधी, त्वमेव तेषां नाशको विक्षेपकः ॥ ९ ॥

**गुन सील कृपा परमायतनं । प्रनमामि निरंतर श्रीरमनं ॥**

हे अनन्त ! कथं मनुष्यैस्त्वदीयगुणकीर्तनं संपादनीयम्, यावत् "*असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सार्वकालं तदापि तव गुणानामीश पारं न याति ॥*"[24] इत्यतस्त्वमेव **गुन** गुणानां **सील** शीलस्य, आचारस्य तथा **कृपा** दयायाः, करुणायाश्च **परमायतनं** आयतनम्, आस्पदं परम्, अनुत्तराश्रयः, त्वं हि निराधारो जगदाधारः । एतेन कारणेन अहं **निरंतरं** पुनः पुनरजस्रं दीर्घकालनैरन्तर्यसत्कारैः श्रीरमनं समग्रैश्वर्यवीर्ययशश्रीज्ञानविज्ञानयुक्तं लक्ष्मीपतिं सीतास्वामिनं भगवन्तं रामं **प्रनमामि** साष्टांगं नमामि ।

**रघुनंद निकंदय द्वंद्वघनं । महिपाल बिलोकय दीनजनं ॥ १० ॥**

**रघुनंद**, हे रघुनन्दन **द्वंद्वघनं** यं सुखदुःखप्रियाप्रियरागद्वेषक्षुत्पिपासाजन्ममरणदृग्दृश्यादिद्वंद्वसमूहम्, एतन्मिथ्यात्वग्रस्तं द्वैतं **निकंदय** निरुन्धि, अभिमर्द सर्वथा छिन्धि, त्वयि निराकारेऽद्वैते भक्तवात्सल्यवाशात् कृताकारे समस्तद्वित्वस्य अवसादनत्वात्, तस्य मूलस्य अविद्यायाः विशरणत्वाच्च । यतः प्रसिद्धमेतत् "*कारणापाये कार्यापायः*" इति नियमात् ।

**महिपाल** हे भूभृत् ! पृथिव्यास्तद्निवासिनां प्रजानामेवं प्रजापालकानामपि स्वामिन्, **दीनजनं** भवावर्तगाहितं यं कमपि प्राणिनं मधुर्यदृष्ट्या **बिलोकय** विशेषेण अवलोकय, पालय, गोपय । धन्यास्ते त्वत्कृपैक्षणक्षणगतेः पात्रीकृता[25] इत्यलम् ॥ १० ॥

*॥ इत्यस्याः पिनुच्चाप्रेमोद्भावितज्ञान्यपराह्नासुहृत्प्रणीतायाः शिवस्तुतेरतिलघुकल्याणव्याख्यायाः पूर्णाहुतिरिति ॥*

एवं समाप्यते मयेदमद्वैतपारकं शिवप्रणीतरामस्तोत्रस्य कल्याणाख्यं व्याख्यानं यत् **पिनुच्चां** प्रति कृताज्ञातां प्रीतिं च प्रदर्शनार्थं यथामति विरचितम् । अस्य अभिक्रमस्य संपादनाय यद्यपि अयोग्योऽहमिति स्वयं मन्ये, तथापि अस्मिन् सर्वथा निरपेक्षेऽद्वितीये रामचारितमानसनामके ग्रन्थेऽशुद्धमपि मल्लेखनं यथाशक्ति निवेशितम् । अत एव अपूतरथ्योदकं यथा गंगायां पतित्वा पवित्रेण गंगाजलेन परिणमते, तथैव परमेश्वरस्य देशिकानां च असीमानुकम्पया ममापि रचना परिशोधिता । अतः प्रसीदन्तु अनयाऽपि अपुण्यकृतिना यावन्तोऽस्मदुपास्या इति तेषां ज्ञानाग्निचरणयोः समर्पयामि यज्ज्ञातमज्ञातं च मदीयमिति विरम्यते ।

**हे पिनुच्चे त्वदीयां मैत्रीमानुभूय धन्योऽहम्, अतस्त्वदीयं वस्तु तुभ्यमेव समर्प्यते ।**

*ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव गन्तव्यं ब्रह्मकर्मसमाधिना ॥*[26] इति शम् ।

## ग्रन्थसूची References


*अमरसिंहः*. २००१ [चतुर्थ सं.]. *नामलिंगानुशासनं नाम अमरकोशः, महामहोपाध्यायश्रीभट्टोजिदीक्षितात्मजविद्वद्वरश्रीभानुजिदीक्षितकृतया 'रामाश्रमी'(व्याख्यासुधा)-व्याख्यया विभूषितः*. श्री पं. हरगोविन्दशास्त्रिणा प्रकाशोपनामक-सरल-मणिप्रभा-हिन्दीव्याख्यया टिप्पण्यादिभिश्च सुसंस्कृत्य सम्पादितः. वाराणसी: चौखम्भा संस्कृत संस्थान.

*ईशादि नौ उपनिषद् शांकरभाष्यार्थ*. २००२. गोरखपुर: गीता प्रेस.


---

[24] शिवमहिम्नस्तोत्रे ३२ ।

[25] अस्मिन् विषये विवेकचूडामणौ ४१ द्रष्टव्यम् ।

[26] श्रीमद्भगवद्गीतायाम् ४।२४ ।

*उपनिषत्संग्रहः*. १९९६ [प्रथम सं.]. पण्डितजगदीशशास्त्रिणा विषयानुक्रमण्या लघुभूमिकया च समलंकृत्य संपादितः. दिल्ली: मोतीलाल बनारसीदास पब्लिशर्स.

करपात्री, स्वामी. २००१ [तृतीय सं.]. *रामायणमीमांसा*. वृन्दावन: राधाकृष्ण धानुका प्रकाशन संस्थान.

Tulasīdāsa. 1996 [IX ed., I ed. 1968]. *Śrī Rāmacaritamānasa or the Mānasa lake brimming over with the exploits of Śrī Rāma (with Hindi Text and English Translation)*. Gorakhpur: Gītā Press.

Tulasīdāsa. 1990. *Śrīrāmacaritamānasa (The Holy Lake of the Acts of Rama)*. Edited and Translated into Hindi and English by R.C. Prasad. Delhi: Motilal Banarsidass.

द्विवेदी, कपिलदेव. २०११ [३८तम सं.]. *रचनानुवादकौमुदी*. वाराणसी: विश्वविद्यालय प्रकाशन.

नरहरि. १९०५. *बोधसारः श्रीविद्वद्वर्यनरहरिविरचितः*. तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः । श्रिमदुदासीनवर्यस्वामिगोविन्दानन्दशिष्येण दयानन्दस्वामिना परिशोधितः. वाराणसी: वाणि विलास प्रेस.

पुष्पदन्त. १९९६ [प्रथम सं. १९८४]. *शिवमहिम्नः स्तोत्रम् आचार्यमधुसूदनसरस्वतीविरचितया मधुसूदनीव्याख्यया अथ च श्रीनारायणपतित्रिपाठिप्रणीतया पञ्चमुखीटीकया समलंकृतम्*. संपादकः आचार्य श्रीकरुणापतित्रिपाठी. वाराणसी: संपूर्णानन्द संस्कृत विश्वविद्यालय.

*बृहदारण्यकोपनिषद् सानुवाद शांकरभाष्यसहित*. १९९८ [अष्टम सं., प्रथम सं.१९३८]. गोरखपुर: गीता प्रेस.

बादरायण. २००० [प्रथम सं. बोम्बई १९१७]. *ब्रह्मसूत्रशांकरभाष्यं श्रीमदप्पयदीक्षितविरचित-परिमलोपबृंहितश्रीमदमलानन्दसरस्वतीप्रणीत-कल्पतरुव्याख्यायुतश्रीमद्वाचस्पतिमिश्रकृत-भामती-विलसितम्. अद्वैतमेवोपानिषदमिति निरूपणात्मकभूमिकया ब्रह्मसूत्रवर्णक्रमकोशादिभिश्च विभूषितम्*. तिरुपतिश्रिवेंकटेश्वरसंस्कृतकलाशालापूर्वमीमांसाध्यापकेन मद्रपुरसंस्कृतकलाशालातो ऽधिगतवेदान्तविशारदविरुदेन नूरणिग्रामाभिजनविद्वद्वरसुब्रह्मण्यात्मजेन श्रीमदनन्तकृष्णशास्त्रिणा टिप्पण्यादिभिरुपस्कृतं पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्नतनुजनुषा श्रीवासुदेवशर्मणा च संस्कृतम्. वाराणसी: कृष्णदास अकादमी.

वाल्मीकि. २००५ [१९तम सं.]. *श्रीमद्वाल्मीकीय रामायण*. २ भाग. गोरखपुर: गीता प्रेस.

विद्यारण्य. २००२. *पञ्चदशी रामकृष्णकृतव्याख्यया विषमस्थलाटिप्पणीपाठान्तरश्रुतिकोशश्लोकविषयसूच्यादिभिः श्रीमत्परमहंसपरिव्राजकाचार्यमहेश्वरानन्दगिरिमहामण्डलेश्वरमहोदयानां भूमिकया च समलंकृता*. काव्यतीर्थेण नारायणरामाचार्येण संपादिता. दिल्ली: चौखम्भा संस्कृत प्रतिष्ठान.

शंकराचार्य. २००१ [२१तम सं.]. *विवेकचूडामणि हिन्दी अनुवाद सहित*. अनुवादक मुनिलाल. गोरखपुर: गीता प्रेस.

*श्रीमद्भगवद्गीता शांकरभाष्य हिन्दी अनुवाद सहित*. २००१ [२१तम सं.]. अनुवादक श्री हरिकृष्णदास गोयन्दका. गोरखपुर: गीता प्रेस.

---

Gianni Pellegrini is Assistant Professor of Indian Philosophies and Religion, and Sanskrit Language and Literature at the Department of Humanities of the University of Turin. His areas of research are: the pre-modern Advaita Vedānta, the Yoga commentarial tradition, Navya Nyāya and the contemporary situation of Indian schools of thought.
He can be reached at: gianni.pellegrini@unito.it.